"यः सपक्षे विपक्षे च भवेत् साधारणस्तु सः।"
"सपक्षविपक्षवृत्तिः साधारणः। सपक्षः साध्यवान्। विपक्षः साध्याभाववान्।" इति मुक्तावली। विकल्पः पक्षः। उक्ताकरणम्। यथा, आर्य्यासप्तशत्याम्। ३५४।
"प्रतिभूः सुखी विपक्षे दक्षः शृङ्गारसंकथा
गुरवः।"
विगतः पक्षो यस्य। पक्षहीने, त्रि।)
विपञ्चिका, स्त्री, (वि+पचि विस्तारे+ण्वुल्। स्त्रियां टाप् अत इत्वञ्च।) वीणा। इति शब्दरत्नावली।
विपञ्ची, स्त्री, (वि+पञ्च+अच्। स्त्रियां गौरादित्वात् ङीष्।) वीणा। इत्यमरः। (यथा, कथासरित्सागरे। ४६। २०।
"अहं ह्येतद्विजानामि तन्त्रीभङ्गारलक्षणैः।
इत्युक्त्वा गुणशर्म्माङ्के तां विपञ्चीं समीप सः।")
केलिः। इति मेदिनी। चे, १७।
विपणः, पुं, (वि+पण व्यवहारे+घञ्। संज्ञापूर्व्वकत्वात् न वृद्धिः।) विक्रयः। इत्यमरः। (यथा, मनौ। ३। १५२।
"विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः।"
विशेषेण पण्यतेऽस्मिन्निति। विपणिः। यथा, महाभारते। १२। ६९। ५३।
"विशालान् राजमार्गांश्च कारयेत नराधिपः।
प्रपाश्च विपणीश्चैव यथोद्देशं समादिशेत्।")
विपणिः, पुं स्त्री, (विपण्यतेऽस्मिन्निति। वि+पण+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पण्यविक्रयशाला। इति हलायुधः। हट्टः। इत्यन्ये। विक्रयार्थप्रसारितनानाद्रव्यायां वणिग्वीथ्यां वाणियाविथी इति बाजार इति च ख्यातायामिति केचित्। हट्टमण्डपः। इति केचित्। हट्टमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति भरतः। तत्पर्य्यायः। पण्यवीथिका २। इत्यमरः। आपणः ३ पण्यवीथी ४ पण्यम् ५। इति रभसः। निषद्या ६ वणिक्पथम् ७। इत्यमरदत्तः। विपणम् ८ वीथी ९। इति कोषः।
"निषद्या विपणिः पण्यवीथिका त्वापणिस्तथा।
पण्यविक्रयशालायां भवेदेतच्चतुष्टयम्।"
इति शब्दरत्नावली।
"विपणिः पण्यवीथ्याञ्च भवेदापणपण्ययोः।"
इति मेदिनी। णे, ७८।
(यथा, महाभारते। ६। ३५। ३०।
"विपण्यापणपण्यानां नानाजनशतैर्वृतः।"
वाणिज्यम्। यथा, मनौ। १०। ११६।
"विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः
कृषिः।
धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः।")
विपणी, [न्] पुं, (विपणः विक्रयोऽस्यास्तीति। विपण+इनिः।) वणिक्। इति जटाधरः। (यथा, शिशुपालवधे। ५। २४।
"पूर्णापणा विपणिनो विपणीर्व्विभेजुः।")
विपणी, स्त्री, (विपणि+वा ङीष्।) हट्टः। इति द्विरूपकोषः। (यथा, कथासरित्सागरे। २०। ६५।
"ययौ भोजनमूल्यार्थी विपणीमात्तमूलकः।")
विपत्तिः, स्त्री, (वि+पद+क्तिन्।) आपत्। विपत्। इत्यमरः। यातना। इति मेदिनी। ते, १५९। यथा,—
भृगुरुवाच।
"श्रुतं सर्व्वं सुरश्रेष्ठ मारोदीर्व्वचनं शृणु।
न कातरो हि नीतिज्ञो विपत्तौ च कदाचन।
सम्पत्तिर्व्वा विपत्तिर्व्वा नश्वरा स्वप्नरूपिणी।
पूर्व्वस्वकर्म्मायत्ता च स्वयं कर्त्ता तयोरपि।"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः।
विनाशः। यथा,—
"यस्मिन् राशिगते भानौ विपत्तिं यान्ति
मानवाः।
तेषां तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया।"
इति मलमासतत्त्वम्।
विपथः, पुं, (विरुद्धः पन्थाः। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यकारप्रत्ययः।) निन्दितपथः। तत्पर्य्यायः। व्यध्वः २ दुरध्वः ३ कदध्वा ४ कापथः ५। इत्यमरः। कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८। इति शब्दरत्नावली। (यथा, महाभारते। १२। ३५९। ११।
"सत्पथं कथमुत्सृज्य यास्यामि विपथं वद।")
विपत् } स्त्री, (वि+पद्+सम्पदादित्वात् क्विप्।)
विपद् } विपत्तिः। इत्यमरः। (यथा,—
"कैवर्त्तकर्क्कशकरात् सफरश्च्युतोऽपि
जाले पुनर्निपतितः सफरो विपाकः।
दैवात्ततो विगलितो गिलितो बकेन
वामे विधौ वद कथं विपदां निवृत्तिः।"
इत्युद्भटः।
यथा च भागवते। १। ९। १५।
"यत्र धर्म्मसुतो राजा गदापाणिर्वृकोदरः।
कृष्णोऽस्त्री गाण्डिवं चापं सुहृत् कृष्णस्ततो
विपत्।")
विपदा, स्त्री, (विपद्+भागुरिमते हलन्तानां टाप्।) विपत्। इत्यमरटीकायां रायमुकुटः।
विपन्नः, त्रि, (वि+पद+क्तः।) विपदाक्रान्तः। इति मेदिनी। ने, १३४। नष्टः। इति शब्दरत्नावली।
विपन्नः, पुं, सर्पः। इति मेदिनी। ने, १३४।
विपरीतः, त्रि, (वि+परि+इ+क्तः।) विपर्य्ययः। उल्टा इति भाषा। तत्पर्य्यायः। प्रतिसव्यः २ प्रतिकूलः ३ अपसव्यः ४ अपष्ठुः ५ विलोमकः ६। इति जटाधरः। प्रसव्यम् ७ पराचीनम् ८ प्रतीपम् ९। इति शब्दरत्नावली। (यथाच शङ्करदिग्विजये।
"मत्तो जातः कलञ्जाशी विपरीतानि भाषसे।
सत्यं ब्रवीषि पितृवत् त्वत्तो जातः कलञ्जभुक्।"
सुमधुः। यथा, रामायणे। ६। १७। १५।
"स च न प्रतिजग्राह रावणः कालचोदितः।
उच्यमानं हितं वाक्यं विपरीत इवौषधम्।")
षोड़शरतिबन्धान्तर्गतदशमबन्धः। यथा,—
"पादमेकमूरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीषु रमते कामी विपरीतस्तु बन्धकः।"
इति रतिमञ्जरी।
अपि च।
"पादमेकमूरौ कृत्वा द्वितीयं स्कन्धसंस्थितम्।
कामिन्याः कामयेत् कामी बन्धः स्याद्विपरीतकः।"
इति स्मरदीपिका।
विपरीता, स्त्री, कामुकी। इति धनञ्जयः।
विपर्व्वकः, पुं, (विशिष्टानि पर्व्वाणि यस्य।) पलाशवृक्षः। इति शब्दचन्द्रिका। (पर्व्वरहिते, त्रि।)
विपर्य्ययः, पुं, (वि+परि+इ+"एरच्।" इत्यच्।) व्यतिक्रमः। तत्पर्य्यायः। व्यत्यासः २ विपर्य्यासः ३ व्यत्ययः ४। इत्यमरः। विपर्य्यायः ५। इति भरतः। (यथा, भागवते। १०। १। ५०।
"विपर्य्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया।
उपस्थितो निवर्त्तेत निवृत्तः पुनरापतेत्।"
सांख्यनये विपर्य्ययाः पञ्च। ते च सांख्यकारिकायां द्रष्टव्याः।)
विपर्य्यायः, पुं, (विगतः पर्य्यायो यस्य। यद्वा, वि+परि+इ+घञ्।) विपरीतमयनम्। अन्यस्यान्यरूपग्रहणम्। इति भरतः।
"विपर्य्याये कुलं नास्ति न कुलं रक्तपित्तयोः।"
इति कुलाचार्य्यकारिका।
विपर्य्यासः, पुं, (वि+परि+अस+घञ्।) विपर्य्ययः। इत्यमरः। (यथा, उत्तरचरिते। २
"पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढ़यति।"
अप्रमात्मकबुद्धिभेदः। यथा, भाषापरिच्छेदे।
"तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे त्वात्मबुद्धिः शङ्खादौ पीतता-
मतिः।"
"आद्यो विपर्य्यासः।" इति मुक्तावली।)
विपव्यं, त्रि, (वि+पू+"अचो यत्।" इति यत्।) शोधनीयम्। विपूर्व्वपूधातोर्यप्रत्ययेन निष्पन्नम्।
विपश्यी, [न्] पुं, बुद्धभेदः। इति हेमचन्द्रः।
विपश्चित्, त्रि, (विशेषं पश्यति विप्रकृष्टं चेतति चिनोति चिन्तयति वा। पृषोदरादित्वात् साधुः।) पण्डितः। इत्यमरः। (यथा, मनौ। ७। ५८।
"सर्व्वेषान्तु विशिष्टेन ब्राह्मणेन विपश्चिता।")
विपाकः, पुं, (वि+पच+भावे कर्म्मणि वा घञ्।) पचनम्। (यथा, भागवते। ५। १६। २०।
"तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति।")